# श्रीमते रङ्गरामनुज महादेशिकाय नमः श्रीरङ्गविमानम्

**Dr. M.V. Madhavachari**
Assistant Professor,
Hon Department of Sanskrit
St. Joseph's College Trichy-2
seshadrimadahvan07@gmail.com

**श्रीमत्वेङ्कटनाथार्यः कवितार्किककेसरी ।**
**वेदान्ताचार्य वर्योमे शन्निवत्तां सदाहृदि ॥**
**अस्मद्गुरु परमगुरुन् यतिवरपूर्णो सयामुनं रामम् ।**
**पद्माक्षनाथ शठजित्सेनेशरमा रमापतीश्च भजे ॥**

गुरुपरंपरां प्रणम्य श्रीरङ्गवैभवं प्रति किंचिल्लिख्यते । 'यावच्छरीरपातमत्रैव श्रीरङ्गे सुखमास्व' वाक्यरत्नमिदं विलसति इति यतीश्वरविरचिते शरणागतिगद्ये । भगवन्तं तदधिष्ठित क्षेत्रं वा वर्णयितुं स्तोतुं वा तन्निकटवर्तिनः पुरुषविशेषस्यैवशक्यं । प्रकृते यतीश्वरः शेषांशक इति सर्वेषां विदितचरं । श्रूयते च

**अनन्तः प्रथमं रूपं लक्ष्मणस्तु ततः परम् ।**
**बल ंभदस्तृतीयस्तु कलौ रामानुजस्स्मृतः ॥ इति**

मधुरिषो श्शय्या किल शेषः । तदुपरि रंगेशः निद्राति जागर्तिवा । स्वयंव्यक्तविमानेषु रंगविमानमाद्यम् । इश्रवण कीर्तन स्मरण मात्रेणैव मुक्तिदायकम् । श्रीरङ्गेशं, रङ्गक्षेत्रं, तदावृतां कावेरी वा साकल्येन स्तोतुं, तन्महिमानं परिच्छेतुं वा संसारें न कश्चिदवततार । आस्तांतावदिदं । श्रीरङ्गनाथपादुकाभूषणां पादुकां सहस्रश्लोकेन स्तुत्वा तत्र भवान् निगमान्तसूरि स्तृप्तिं न लेभे । श्रूयते किल पादुकासहस्रे यथाः-

**निश्शेषमम्बरतलं यदि पत्रिका स्यात्**
**सप्तार्णवी यदि समेत्य मशी भवित्री ।**
**वक्ता सहस्रवदनः पुरुषस्स्वयं चेत्**
**लिख्येत रङ्गपतिपदूकयोःप्रभावः ॥ इति**

तत्रैव किं तैः केशव पादुका गुणमहाम्बोधे स्तटस्थावयम् इति च अत एव भगवान् भाष्यकारः जीवस्य श्रीरङ्गवासः श्रेयस्कर इति प्रकटयामास । एतदन्य भगवत्क्षेत्राणामप्युपलक्षणम् ।

**श्रीरङ्गविमानप्रादुर्भावप्राकारः**

ब्रह्माण्डपुराणे रङ्गक्षेत्रवैभवंप्रति रुद्रनारद संवादरूपेणमहती चर्चा विद्यते । माहेश्वरसंहितायां, गारुडपुराणे, पाद्मपुराणे च रङ्गक्षेत्र मधिकृत्य विलसतिबिचारः । यथा प्रमाणमनुसृत्य श्रीरङ्ग वैभवः किंचिदुच्यते । आदौ जगदिदमासीत्तमो भूतम् । ‘‘तम आसीतमसागूढमग्रे प्रकेतम्’’ इति श्रुतिः । तदा एक एवातिष्ठद्देबो नारायणः प्रभुः । विचित्रसृष्टिकलया विहर्तुं तस्य कामस्समजनि । संकल्प समनन्तरमेव सुमनोहरं नालमभूत्तस्यनाभितः । परमात्मनस्संकल्पात् नालोपरि विकस्वरे पुण्डरीके सृष्टश्चतुर्मुखः । तस्य भगवदाज्ञया सत्यलोके वासश्च । कालेन स्वपदस्यादि क्षयमाशंकमानश्चतुर्मुख क्षीरसमुद्रं गत्वा तपस्तेपे । तपस्तुष्टों भगवात्मानं दर्शयामासचतुर्मुखस्यं प्रजापति र्नित्यार्चनाय भगवदर्चारूप मनुगृहणीष्वेति भगवन्तं प्रार्थयामास । अचिरेणैव क्षीरसागरा न्मदर्चा मूर्तिरागमिष्यतीति ब्रह्माणमाश्वास्य भगवानन्तर्दधे । अत्रप्रमाणं ब्रह्मण्डपुराणे

**तस्यवर्षसहस्रान्ते तप्यमानस्य बेधसः ।**
**आविरासीन्महद्धाम श्रीरङ्गं क्षीरसागरात् ॥**
**बिष्वक्सेनो वेत्रपाणिः पृष्ठतस्तदसेवत ।**
**दिव्यं विमानं तद्धृष्ट्वा स्वयं व्यक्तं महर्धिमत् ।**
**तेजोमयं जगद्व्यापि श्रीरङ्गं प्रणवाकृतिम् ॥**
**पपात शिरसा भूमौ च्छिन्नमूल इव द्रुमः ।**
**इति सुनन्दादय एवं घोषयामासुः ।**
**त्र्यक्षरंब्रह्मपरमं शद्बात्मैवं व्यवस्थितम् ।**
**तस्य च प्रतिपाद्योयं शेतेतंः श्रीनिकेतनः ॥**

प्रमोदभरेण विकसितांगश्चतुर्मखः प्रणवाकारविमानं सत्यलोकं नीत्वा यथाविधि संस्थाप्य षोडशोपचारादिना रङ्गनाथं तोषयामास । भक्तपरोधीनो भगवान् ब्रह्माणमब्रवीत् ।

**स्थितोऽहं परमे व्योम्नि अप्राकृत शरीरवान् ।**
**अर्चात्मनावतीर्णौस्मि भक्तानुग्रहकाम्यया ॥**
**आद्यमर्चावतारंमे नित्यमर्चय मुक्तये ।**
**आद्यं स्वयं व्यक्तमिदं विमानं रङ्गसंज्ञकम् ।**
**श्रीमुष्णं वेङ्कटाद्रिश्च शालग्रामं च नैमिशम् ॥**
**तोताद्रिः पुष्करं चैव नरमारायणाश्रमः ।**
**अष्टौ मे मूर्तयस्सन्ति स्वयंव्यक्ता महीतले ॥**
**इति विमानान्तः प्रविश्य शेषपीढे सुष्वाप ।**

**रंगराजस्तवे श्रीवत्सचिह्नमिश्राः**

**परेणनाकं पुरि हेममय्यां यो ब्रह्मकोशोस्त्यपराजिताख्यः ।**

**श्रीरङ्गनाम्ना तमपौरुषेयं विमानराजं भुवि भावयामि ॥**

अनेन श्लोकेन प्रत्यभिज्ञाप्यते श्रीरङ्गाख्यमपौरुषेयं विमानं ब्रह्मलोके स्थित्वः भुवमलंचकारेति । भुवं कथं अवततारेति बिचारयामः बसिष्ठः इक्ष्वाकुं प्रत्याहः-

**यथा ब्रह्मण्डपुराणेः-**

**पुराणे मुनिभिर्दृष्टं अर्थमागामिनं शृणु ।**

**भवनतमुपदिश्येह सत्यलोकत्स्ययंभुवः ॥**

**जगतामुपकाराय बिष्णोघमि गमिष्यति ।**

**तपसा तोबितस्तुभ्यं तच्च दास्यति लोककृत् ।**

**अयोध्यायां चिरंकालं श्रीमद्रंगं भविष्यति ॥**

**अवतीर्य भवद्वंशे रामो नाम जनार्दनः ।**

**निहनिष्यति दुर्वृत्तं रावणं लोककण्टकम् ॥**

**बिभीषणाय तद्भ्रात्रे प्रियाय प्रियकारिणे ।**

**प्रियं बिमानं श्रीरङ्गं रामदेवः प्रदास्यति ॥**

**स तु नेष्यति कावेर्या श्चन्द्रपुष्करिणी तटम् ।**

**तत्रैव कावेरीगमने कारणमाहः-**

**रङ्गक्षेत्रसमीपे निचुळापुरे (वरेयूर्) धर्मवर्माख्यः**

**राजा धर्मेण राज्यं चक्रे । कदाचित् कृतबहुविधतपः**

**कर्माणं धर्मवर्माणमुद्धिष्य मुनिभिः**

**अभ्यर्थितस्तदास्माभिः दाल्भ्येन च महीपते ।**

**नित्यं वासं कुरुष्वात्रेत्यादरेण पुनः पुनः ॥**

**उवाच प्रीयमाणन वचनेन जनार्दनः ।**

**आगमिष्यामि कावेर्यां चन्द्रपुष्करिक्षीतटम् ॥**

**विभीषणापदेशेन श्रीरङ्गं धाम मामकम् ।**

**चन्द्रपुष्करिणीतीरे सह्यजायास्तुसैकते ।**

**अनन्तपीठे श्रीरङ्गं यूयं द्रक्ष्यथ माचिरम् । इति**

**आदित्यं प्रति भगवदुक्तिश्च अयोध्यांयां भवद्वंश्यैः कावेर्यां च दिवाकर ।**

**अर्चितोऽहं भविष्यामि नैरन्यैश्च मामकैः ॥**

**पारमेश्वरसंहितायां चः-**

> **रामो राजीवनयनो भ्रातृभेर्दैस्त्रिभिस्सह ।**
> **ददौ विभोषणायासौ प्रियाय प्रियकारिणे ॥**
> **सोऽपि तच्छिरसागृह्य ययौ देशं स्वकं प्रति ।**
> **रवौ मध्यंदिने प्राप्ते कवेरतनयातटे ।**
> **चन्द्रपुष्करिणीतीरे ऽनन्तपीठे ऽवतारयत् ॥**

इत्यादिभिः कारणैः रङ्गविमानं कावेरीतटमवाप । इयता प्रबन्धेन ऐक्ष्वाकुभीराजभिराराधितो रङ्गनाथो कावेरीमापेत्यबोधाम । परन्तु रामायणे इक्ष्वाकुवंश्यै राराधितः रङ्गनाथ ऐेति न कुत्राप्युक्तं मुनिवरेण बाल्मीकिना । किंच

> **प्राणायामेन पुरुषं ध्यायमाना जनार्दनम् ।**
> **''सह पत्न्या विशालाक्ष्या नारायणमुपागतः**
> **''लब्ध्वा कुलधनं राजालंकां प्रायद्बिभीषणः''**
> **इत्यदिना इक्ष्वाकूणामाराध्यदेवः जनार्दनः**
> **नारायणश्चासीत् न रङ्गविमानं । तथापि**
> **श्रीमत्यायतने विष्णोः शिश्ये नरवरात्मजः ।**
> **पूर्वां संध्यामुपासीनः जजाप यतमानसः ॥**

पद्यरत्नोयं रंगविमानमेव स्मारयति । श्रीमति इत्यत्र विद्यमानं श्रीशंद्बं वेदत्रय सारभूत् प्रणवमेव विशिनष्टि । श्रुतिश्च ऋचस्सामानि यजूषि । साहि श्रीरमृतासतां अत्र भाष्यं लिखन् भट्टभास्कर सर्ववेदाभिषिक्तः तत्सारत्वात् अत्र भाष्यं लिखन् भट्टभास्करः सर्ववेदाभिषिक्तः तत्सारत्वात् सर्ववेदात्मा प्रणवः श्रीः इति व्याचख्यौ । अतः अपौरुषेयविमानं रङ्गविमानं इति प्रसिद्धिश्च । ध्यानश्लोकश्च

> **विमानं प्रणवाकरं वेदशृंगं महाद्भूतम् ।**
> **श्रीरङ्ग शायी भगवान् प्रणवार्थप्रसादकः ।**
> **प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ॥ इति**

श्रीरामेण दत्तं रङ्गविमानं विभीषणो न लङ्कां निनाय । मध्येमार्गं निचुळापुरे ब्रह्मरथार्थ धर्मवर्मणा प्रार्थितः तत्रावतारयामास । ततः उद्धर्तुं न शशाकः यथा ''नाशकद्रंगमुद्धर्तुं अपि सर्वं प्रयत्नतः तदा निर्विण्णे विभीषणे भगवदुक्तः तवाभिमुखमेवात्र शयिष्येहं विभीषण'' इति समाश्वास्य तं लङ्कां प्रेषयामास । इत्थंच श्रीमत्या यतने इति रामायणस्थशद्बस्य रङ्गविमाने इति फलितोऽर्थः । एवं रङ्गविमानं क्षीरसागरात्सत्यलोकं, ततः अयोध्याम् ततः कावेरीतटं प्राप्य स्थितः । अतएव दक्षिणादिक् सर्वोत्तराऽभूत् । अयमेव विषयः पादुकासहस्त्रे निगमान्तसूरिणा ।

**सत्याल्लोकात्सकलमहितात् स्थानतो वा रघूणां**
**शंके मातः समधिकगुणं सैकतं सह्यजायाः ।**
**पूर्वं पूर्वं चिर परिचितं पादुके यत् त्यजंत्या**
**नीतो नाथस्तदिदमितरन्नीयते न त्वयासौ ॥ इति**

पूर्वं पूर्वस्थानापेक्षया सह्यजासैकतस्याधिक्यमुपपादि । अन्यच्च । पुरैकदा विन्ध्यगिरौ नदीनां सभा प्राचलत् । तस्याम् नदीषु का श्रेष्ठतमेति चर्चा समजनि । तदासत्लोकाधिपतिः विष्णुपादस्पर्शात् गंगा समधिकागुणेति निर्णयंचकार । निर्विष्णा कवेरजा सारक्षेत्रं गत्वा तपस्तपे यथा

**सारक्षेत्रे तु कावेरी संस्थाप्य प्रतिमां हरेः ।**
**चिरमाराधयामास तस्यै दत्तस्तदा मया ॥**
**मत्संबंधायकावेरी त्वन्मध्ये धाम मामकम् ।**
**आगमिष्यति रंगाख्यं यत्रनित्यं वसाम्यहम् ।**
**नित्यवासं करिष्यामि त्वन्मध्ये सरितां वरे ॥**
**गंगाया अधिका भूयाः नित्ययोगान्मया सह ॥**

इत्यादि श्रीरङ्गमाहात्म्यस्था कथात्रानुसन्धेया । अतएव निगमान्त गुरुभिः समधिकगुणं सैकतं सह्यजायाः इत्युक्तं । कदाचित् बिष्णुपाद संयोगात् गंगायाः पावित्र्यं । श्रीमद्रामायणे हि भवांगपतितं तोयं पवित्रमिति पस्पृशुः न तु स्नानं चक्रुः । भगवतो नित्यगोगात्सह्यजाया गंगातस्समधिकपावित्र्यं यथाहंससंदेशे

**स्रोतोबेगादथ जनपदं सौम्य सीमन्तयन्ती**
**प्रत्यादेशो विबुधसरितस्स्यन्दते सह्यकन्या ।**
**काले काले परिणति वशात् पर्वभेदावकीर्णैः**
**पुण्ड्रे क्षूणां पुळिनविशदं गद्गदा मौक्तिकौघैः ॥**

पद्येस्मिन् विबुधसरितः प्रत्यादेशः इति स्पष्टमभिहितम् । श्रीरङ्गराजस्तवे श्रीवत्सचिहनमिश्राश्च

**तीर्थं शुन्धति पाति नन्दनतरून् स्थयांगणान्युक्षति**
**स्नानीयार्हणपानवारि वहरि स्नातः पुनीते जनान् ।**
**श्यामं वेदरहोप्यवक्ति पुळिने फेनैर्हसन्तीव तत्**
**गंगां विष्णुपदीत्वमात्र मुखरां हेमापगा हत्वधम् ॥ इति**

अद्यापौरुयेयविमानांगा कल्याणरंगं सेवयामः । मंगळांगोहि श्रीरङ्गः । न तस्य प्राकृता मूर्तिः'' इत्यौपनिषदीवाक् । अर्चाभूर्ति विभवावतारस्य प्रतिनिधिः । प्राकृतजनानां प्रतिमायां भगवत्सांनिष्यबुद्धिर्नोदेति । लोकोत्ताणां तदीयानां मंगळ मंगळविग्रहं दृष्ट्वा तृप्तिरेव नोदेति । लक्ष्म्याः

मणिमुकुइव इन्द्रनीलमणेः प्रत्यादेश इव कामपि नोलकान्ति मातनोति तस्य वपुः । इत्थं च विलक्षणानां पुनः प्रतिभा भोग्यभूता । भक्तांध्रिरेणुसूरिः रंगेश मनुभूय उडलेन कुरूहुमालो एन् शैय्केन् उलहतीरे इति शिथिलतां प्राप । भगवद्रूपं दृष्ट्वा तेषां शरीरं हिमद्द्रवति । वयं शिलास्तंभवत्तिष्ठामः । श्रूयते हि

**मणिविडंबिनि तस्य मनोहरे बपुषि मप्नमना मुनिमण्डली ।**
**जपममुंचत होमममुंचत व्रतममुंचत वेदममुंचत ॥ इति किंच**
**यां दृष्ट्वा यमुनापिपासुरनिशं ब्यूहो गबां गाहते**
**बिद्युत्वानिति नीलकण्ठनिवहो बां द्रष्टुमुत्कण्ठते ।**
**उत्तंशाय तमालपल्लव मिति च्छन्दन्तियां गोपिकाः**
**कान्तिः कालियशासनस्य वपुषः सा पावनी पातु नः ॥ इति**

कश्चन कविः तां कान्ति मतुबभूव । श्रीमान्निगमान्तसूरिश्च हरिनीलशिलाविभंगनीलाः प्रतिभास्संतु ममान्तिमप्रयाणे इति तादृशी नीलकान्तिरन्तिमकाले ममपुरतः प्रसरत्विति प्रार्थयामास ।

भगवान् केषुचिद्दिव्यदेशेषु तिष्ठन्, उपविशन्, शयानश्च सेवां ददाति । तेषु शयनमूर्ति रतिमनोहरा भोग्य भूता च । गोदा देवी च पैय्यित्तुयिन्नपरमनडिपाडि बेल्लत्तरविल् तुय्लमरन्दवितिनै इति मुहुर्मुहुश्शयनमूर्तिमनुभवति । मुनिर्विश्वामित्र श्शयानं श्रीरामं दृष्ट्वा स्वकार्यमपि विस्मृत्य कौसल्या सुप्रजाराम इति मंगळमूर्ते रुत्पत्ति भूमिं कौसल्यामस्तौषीत् । भक्तांध्रिरेणुसूरिः इच्चुवैतविरियान् पोय् इंदिरलोकमाळुं इति शयानं रङ्गेश मनुभवन् देवेन्द्रपदवीं तृणमिवलघु मेने । श्रीमान् शठगोपसूरिश्च कंगळुपुहलुं इति नायिकावस्थामापन्नः मुह्यति । जनकात्मजा च चित्रकूटपरिसरे शयानं राममनुस्मरन्ती गते त्रयोदशे वर्षे सुस्व समयाबोधितः श्रीमान् सुखसुप्तः परंतप इतिहनूमति कथयन्ती दुःखितवती । हंससंदेशे तत्रभवान्निगमान्त सूरिश्च ।

**सत्वे दिव्ये स्वयमुदयतस्तस्य धाम्नः**
**प्रसंगात् मंजूषायां मरकतमिव भ्राजमानं तदन्तः ।**
**चेतो धावत्युपहितभुजं शेषभोगे शयानं**
**दीघपिगां जलधितनयाजीवितं देवमाद्यम् ॥**

श्लोकस्यास्य रसास्वादिनी व्याख्याभिप्रायः किंचिल्लिख्यते । सत्वे दिव्ये शुद्धसत्वमये नित्यविभूतिप्रदेशेस्थितमेव परवस्तु साधनान्त्र नैरपेक्ष्येण स्वयमेव विमानान्तः प्रविश्य भुवमाजगाम । मंजूषायां गारुत्मतमणिरिवेत्युपमानेन दिव्यमंगळविग्रह कान्तिभिः विमानतिः प्रदेशमखिलमपि मेचकीकुर्वतमिति व्यज्यते । चंपूरामायणे च

**क्षीराम्बोधेर्जठरमभितः देहभासां प्ररोहैः**
**कालोन्मीलत्कुवळयदणद्वैत मापादयन्तम् । इति**

उपहितभुजमित्यनेन सौकुमार्यं सौगंध्यादिभिः शेष भोग शय्यानुगुणं उपधानान्तरं दुर्लभमिति तदनुगुणं शेषभोगमनोहरं स्वबाहुमेवोपथायेति ध्वन्यते । भोग शब्देन मृदुस्पर्शादिभिः तस्य निरतिशय भोगावहत्वं सूच्यते । भक्तांघ्रि रेणुसूरिः पच्चे मामलेपोल्मेनि इति स्तुवन् निरतिशय भोग्यभूत नीलतनुं संसेव्य तृप्तिं न लेभे । तत्रभवान्वेदांत सूरिश्च आरादवरुळमुदं पोतिंद कोयिल् इति तदपौरुषेयविमानं नानाप्रकारतयानुबभूव । दीर्घापांगमित्यनेन भक्तरक्षणप्रावण्येन दयासुधासारनिर्भरतया तदपचारविचा रावधीरणेन निरर्गळं सुदूरविसृमरा कटाक्षाः इति सूच्यते। रामो रक्तांतलोचन इति हि श्रूयते । जलधितनयाजीवितं लक्ष्म्याः प्राणतुल्यमितियावत् अनेन

**आत्मप्रमाणरचिते सृदुस्पर्शे मनोहरे ।**
**शुद्धस्फटिकसंकाशे दीप्यमानेति भास्वरे ॥**
**फणामण्डलमध्यस्थै मणिभिर्दीपिते तथा ।**
**दक्षिणं भोगि भोगाभमुपधाय महा भुजम् ॥ इति**

पारमेश्वर संहितोक्तप्रकारः प्रत्यभिज्ञापितः । अनेन वासुदेव नागराज दिव्य देहयो रन्योन्य संबंधेन परभाग शोभा व्यज्यते किंच

**योगि ध्येयमजं नित्यं जगज्जन्मादिकारणम् ।**
**अनादिनिधनं देवं साक्षाल्लक्ष्मीपती प्रभुम् ॥**
**अप्राकृततनुं शांत बासुदेवं परात्परम् ॥ इति साक्षाद्वासुदेव**

एव श्रीरङ्गधाम्नि प्रकाशते इति च संहिता प्रत्यभिज्ञापयति । अर्थात् रङ्गेशः परवासुदेवमूर्तिः तत्संगात् कावेरीविरजा रंङ्गमंदिरं वैकुठं । तथाहि

**कावेरी विरजा सेयं बैकुंठं रङ्गमन्दिरम् ।**
**स वासुदेवो रङ्गंशः प्रत्यक्षं परमं पदम् ॥ इत्याद्यपि**
**अत्रैवानुकूलम् । रङ्गराजस्तवे श्रीवत्सचिह्नमिश्रसूरिश्च**
**कावेरी मवगाहिषीय भगवद्भोगांतरायीभव**
**त्कर्मक्लेशफलाशय प्रशमनोद्वेलामलस्रोतसम् ।**
**जतोस्संसरतोर्चिरादि सरणिव्यासंग भंगाय या**
**लोकेस्मिन्विरजेव बेल्लितजला श्रीरङ्गमालिंगति ॥**

इत्याद्यपि संगच्छते । इत्यच मितबुद्धिना मितवाकेयः श्रीरङ्गवैभवं प्रकाशयितु मशक्नुवानः कस्यचित्कवेः द्यरत्नमनुसंदधानः विरमामि ऐन्द्रीं पाटलयन्नलत्ककरुचामङघ्रित्विषां पल्लवैः नानारत्नकिरीट कोटिकषुणिभिः प्राचेतसीयामपि । पर्यके पवमानतूलभरिते पारे कवेरात्मजम् मुद्रा काचन मुक्तिदानकुशला निद्राति जागर्ति वा ॥